act resembles the counting of chickens before they are hatched. But man often indulges in giving names to his activities which are non-existent.

**अतिदेशन्यायः** Vide Dictionary p. 42.

**अत्यन्तपराजयाद्वरं संशयोऽपि** It is better to have even a doubtful condition than a crushing defeat; cf. मारणाय गृहीतोऽङ्गच्छेदं स्वीकरोति । and मरणाद्वरं व्याधिः । Survival after all is preferable to complete destruction. "Half a loaf is better than no bread." सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डितः । Pt.

**अधिकारन्यायः** The rule regarding qualifications (required of a sacrificer). The sixth adhyāya of MS. deals with this topic. दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत । ज्योतिष्टोमेन स्वर्गकामो यजेत । etc. are the injunctions under discussion. किंचित्तु पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणं भवति। यथाध्ययनसिद्धा विद्या, अग्निसाध्येषु च कर्मसु आधानसिद्धाग्निमत्ता, सामर्थ्यं च । मीमांसान्यायप्रकाश.

**अनन्यलभ्यः शब्दार्थः** The meaning of a word is that which cannot be known from any other source (such as implication etc.). cf. स एव हि शब्दस्यार्थो यः प्रकारान्तरेण न लभ्यते। अनन्यलभ्यः शब्दार्थ इति न्यायात्। अत एव न गङ्गापदस्य तीरमर्थः। लक्षणयैव प्रतिपत्तिसंभवात्। मीमांसान्यायप्रकाश. यः शब्दो यत्र वृद्धैरसति वृत्त्यन्तरे प्रयुज्यते स तस्य वाचको यथा स्वर्गशब्दः सुखविशेषे प्रयुज्यमानस्तस्य वाचकः । कुसुमाञ्जलि.

**अनारभ्याधीतविधिन्यायः** The maxim of the injunctions (such as यस्य खादिरः स्रुवो भवति स च्छान्दसामेव रसेनावद्यति, सरसा अस्याहुतयो भवन्ति । यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति । etc.) studied or taught or read without reference to any particular subject. These विधिs are to be construed with प्रकृत्यर्थ alone (तस्मात् प्रकृत्यर्थोऽनारंभ्यविधिः ।).

**अनुवृत्तिन्यायः** The maxim of service, obedience or repetition. cf. सिंहो बली द्विरदशूकरमांसभोक्ता संवत्सरेण कुरुते रतिमेकवारम् । पारावतः खरशिलाकणभोजनोऽपि कामीति नित्यमनुवृत्तिरिहापि हेतुः ॥

**अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः** The rule which proves that out of the proximate (closely related) and the remote (distantly related) the former is stronger. Read : 'तत् कस्य हेतोः? अत्र हि पूर्वः प्रत्ययो भवेत् । ये धर्मा अपूर्वार्थाः, ते साक्षादपूर्वेणासंबध्यमानास्तदङ्गेषु विज्ञायन्ते। अतस्तत्र बुद्धिरपूर्वासंभवेन निवर्तमाना अङ्गेषु प्रवर्तमाना अन्तरङ्गे तावदापतति । ततो व्यवहिते बहिरङ्गे । यत्र च पूर्वमापतति तत्रैव तिष्ठति, तदतिक्रमे कारणाभावात्' । ŚB. on MS. 12. 2. 11.

**अन्तर्दीपिकान्यायः** The maxim of a lamp in a central position. The maxim applies to a thing which serves a double purpose. cf. 'नित्यं सर्वदा । नित्यं सत्येन नित्यं तपसा नित्यं सम्यग्ज्ञानेनेति सर्वत्र नित्यशब्दोऽन्तर्दीपिकान्यायेनानुषक्तव्यः' । Śaṁkara on Muṇḍ 3. 1. 5. cf. देहलीदीपन्याय and मध्यदीपन्याय.

**अन्धकवर्तकीयन्यायः** The maxim of the blind man and the quail. This maxim, along with अजाकृपाणीय, काकतालीय etc., is used to express a wholly fortuitous occurrence. 'अन्धकश्च वर्तका च अन्धकवर्तकम् । अन्धकस्य वर्तकाया उपर्यतर्कितः पादन्यास उच्यते। तत्तुल्यमन्धकवर्तकीयम्' com. on G. M. 3. 195; संसारसागरमिमं भ्रमता नितान्तं जीवेन मानवभवः समवापि दैवात्। तत्रापि यद्भुवनमान्यकुले प्रसूतिः सत्संगतिश्च तदिहान्धकवर्तकीयम्' । यशस्तिलक 2. 153.

**अन्धगजन्यायः** The maxim of blind men and an elephant. Several blind men, each one touching the particular limb of an elephant, tried to form an idea of the shape of that elephant. As none of them could get the entire view of the elephant none could form a comprehensive judgment of the shape of the animal. Their judgment was bound to be incomplete, defective and lop-sided. The maxim illustrates the divergence of views held by the ignorant about God.

**अन्धगोलाङ्गूलन्यायः** The maxim of the blind man and the cow's tail. The maxim is used to illustrate how the guillible are often waylaid by the wicked. A wicked man found a blind man wandering helplessly. The wicked man expressing sympathy for the blind, deprived him of his valuables and putting a cow's tail into his hand told him to follow her. The result is anybody's guess. 'यदि चाज्ञस्य सतोः मुमुक्षोरचेतनमात्मानमात्मेत्युपदिशेत् प्रमाणभूतं शास्त्रं स श्रद्दधानतयान्धगोलाङ्गूलन्यायेन तदात्मदृष्टिं न परित्यजेत् तद्व्यतिरिक्तं चात्मानं न प्रतिपद्येत तथा सति पुरुषार्थाद् विहन्येतानर्थं च ऋच्छेत्। Ś. B. on Br. Sūt. 1. 1. 7.

**अन्धदर्पणन्यायः** The maxim of a mirror for a blind man. The maxims like अरण्यरोदनन्याय, मूर्खसेवनन्याय, जलताडनन्याय etc. belong to the class of this maxim. The maxim is used to illustrate the vainness of efforts. यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् । लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ H. 3. 115.

**अन्धपरंपरान्यायः** The maxim of a continuous series of blind men. The maxim is used in those cases where people blindly or thoughtlessly follow others, not caring to see whether their doing so would not be a leap in the dark. cf. अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः । दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥ Kaṭh. 1. 2. 5; अनादित्वेऽपि अन्धपरंपरान्यायेनाप्रतिष्ठैवानवस्था व्यवहारलोपिनी स्यान्नाभिप्रायसिद्धिः । Ś. B. on Br. Sūt. 2. 2. 30.

**अन्योन्याश्रयन्यायः** The rule of mutual interdependence. The causes which are mutually dependent lead to no sound result in science. A vessel tied to another vessel leads to the safety of neither.

**अन्वयव्यतिरेकन्यायः** The rule of presence and absence; positive and negative assertion. cf. All A is B. All not-B is not-A. यत्सत्त्वे यत्सत्त्वमन्वयः, यदभावे यदभावो व्यतिरेकः । अन्वयेन व्यतिरेकेण च व्याप्तिमिति हेताबयं प्रवर्तते । यथा वह्नौ साध्ये धूमवत्त्वम् । यत्र यत्र [illegible]